एकोनविंशतिः:पाठः

## चन्द्रशेखरआजादः



चन्द्रशेखरआजादः महान् राष्ट्रभक्तः आसीत्। अस्य जन्म मध्यप्रदेशस्य भावराग्रामे (वर्तमाने चन्द्रशेखर- आजादनगरे) अभवत्। तस्य पिता श्री सीतारामः माता च श्रीमती जगरानी देवी आस्ताम्। आचार्यनरेन्द्रदेवः काशीविद्यापीठे तस्य अध्ययनव्यवस्थाम् अकरोत्। विद्यापीठस्य छात्रैः सह असहयोगान्दोलने सम्मेलितः अभवत्। सः त्रिवर्णं ध्वजं नीत्वा 'जयतु महात्मा गान्धी' 'जयतु भारतमाता' इति घोषयन् न्यायाधीशस्य सम्मुखे उपस्थितः अभवत्। न्यायाधीशः तम् अपृच्छत् तव नाम किम् ? सः उत्तरं दत्तवान्-मम नाम 'आजादः इति। कुद्धः न्यायाधीशः तस्मै पञ्च चदशकशाघातदण्डं दत्तवान। भारतमातुः जयकारं कुर्वन् ब्रिटिशसाम्राज्यस्य विनाशाय दृढ़प्रतिज्ञाम् अकरोत्। आजादः प्रयागस्य अल्फ्रेडपार्कनाम्नि उद्याने आंग्लरक्षिभिः परिवृतः। आरक्षकाणां गुलिकावृष्टिं दृष्टवा सः अपि गुलिकाप्रहारम् आरभत्। यदा तस्य पाश्र्वे एका गुलिका अवशिष्टा तदा सः आत्मानम् एव हतवान्। एवं सः आजीवनम् आजादः आसीत्। देशस्य स्वतन्त्रतायै मृतः अपि सः अमरः अभवत्।

## शब्दार्थाः

**तस्मात्-**उनसे, **त्रिवर्णं ध्वजम्-**तिरप्रे ध्वज को, **घोषयन्-** चिल्लाते हुए, **पञ्चदशकशाघातदण्डम्-** 15 कोड़े मारने का दण्ड, **दत्तवान्-**दिया, **आंग्लरक्षिभिः-**अंग्रेज सैनिकों के द्वारा, **गुलिकावृष्टिम्-**गोलियों की वर्षा को **आत्मानम्** - स्वयं को, **सम्मेलितः -** भाग लिया।

## अभ्यासाः

**1. एकपदेन उत्तरत-**

(क) महान् राष्ट्रभक्तः कः आसीत् ?

(ख) सः कस्मिन् आन्दोलने सम्मिलितः अभवत् ?

(ग) आजादस्य मातुः नाम किम् आसीत्

(घ) सः कस्य विनाशाय दृढ़प्रतिज्ञाम् अकरोत् ?

(ङ.) चन्द्रशेखर आजादः उद्याने कैः परिवृतः ?

**2. सत्यकथनानां समक्षम् 'आम्' असत्यकथनानां समक्षं 'न' इति लिखत-**

(क) चन्द्रशेखरस्य जन्म बिहार प्रदेशे अभवत्। ( )

(ख) आजादः ब्रिटिशसाम्राज्यस्य विनाशाय दृढ़प्रतिज्ञाम् अकरोत्। ( )

(ग) आंग्ल-आरक्षकः चन्द्रशेखरं हतवान्। ( )

(घ) सः असहयोगान्दोलने सम्मिलितः अभवत्। ( )

**3. उदाहरणानुसारं परिवर्तयत-**

यथा- ग्रामः - ग्रामे नगरम् - नगरे

विद्यालयः - .............. उद्यानम् - ..............

प्रदेशः - .............. जीवनम् - ..............

देशः - .............. विद्यापीठम् - ..............

वृक्षः - .............. गृहम् - ..............

कार्यालयः - .............. पुस्तकम् - ..............

**4. वाक्यानि पूरयत -**

(क) चन्द्रशेखरस्य जन्म मध्यप्रदेशस्य ............................ग्रामे अभवत् ।

(ख) आजादस्य पितुः नाम ........................................................ आसीत्।

(ग) विद्यापीठस्य छात्रैः सह ................................. सम्मिलितः अभवत्।

(घ) देशस्य स्वतन्त्रतायै मृतः अपि सः .................................... अभवत्।

शिक्षणसंकेतः

- शिक्षकः चन्द्रशेखरआजादस्य विषये चर्चां कुर्यात् ।